हर हर शङ्कर ॐ जय जय शङ्कर








श्री-वेदव्यासाय नमः

# श्रीमद्-आद्य-शङ्कर-भगवत्पाद-परम्परागत-मूलाम्नाय-सर्वज्ञ-पीठम्
# श्री-काञ्ची-कामकोटि-पीठम्
# जगद्गुरु-श्री-शङ्कराचार्य-स्वामि-श्रीमठ-संस्थानम्

# भीष्म-तर्पणम्

**५१२६ विश्वावसुः मकरः १३ माघ-शुक्ल-अष्टमी**
**२६.०१.२०२६**

Shri Bhishma Pitamaha whose very nature was dharma undertook a vow of Brahmacharya and lived as a Brahmachari throughout his life. Hence, he did not have any descendants. He had the boon of icchamrtyu (choosing when he could leave his body). So he waited until Uttarayanam and shed his mortal on Shukla Ashtami in Magha masa. Therefore, all of us should offer Tarpanam and Arghyadanam for the sake of Bhishma on Magha masa Shukla Ashtami. Laugakshi Smrti says that those who offer this Bhishma Tarpanam gets as much punya as feeding a thousand brahmanas.

अष्टमी-दिवसे चैव भीष्म-तर्पण·माचरेत्।
दद्यात् प्रदद्याद् भीष्माय तर्पणं प्रतिवत्सरम्॥

तेन तर्पण-मात्रेण सहस्र-द्विज-भोजने।
यत् फलं कथितं सद्भि·स्त·दवाप्नो·त्यसंशयः॥


वेद-धर्म-शास्त्र-परिपालन-सभा
9884655618 8072613857 vdspsabha@gmail.com vdspsabha.org

शुक्ला॰ष्टम्यां तु माघस्य दद्याद् भीष्माय यो जलम्।
संवत्सर-कृतं पापं तत्-क्षणा॰देव नश्यति॥

ब्राह्मणाद्या॰श्च ये वर्णाः दद्यु॰र्भीष्माय नो जलम्।
संवत्सर-कृतं तेषां पुण्यं नश्यति सत्तम॥

Padma Puranam also warns that those who do not not offer this Tarpana to Bhishma on Bhishmashtami, lose the punya accumulated during the entire year. Hence we should all offer Tarpanam and Arghyadanam for the sake of Pitamaha Bhishma and strive to become those who perform their duties well.

After completion of the anushthanas of nityakarmas such as morning Snanam, Sandhyavandanam everyone should do Tarpanam and Arghyadanam for Bhishma.

**आचमनम्। शुक्लाम्बरधरं + शान्तये। प्राणायामः।**

**ममोपात्त-समस्त-दुरित-क्षय-द्वारा श्री-परमेश्वरप्रीत्यर्थं शुभे शोभने मुहूर्ते अद्य ब्रह्मणः द्वितीय-परार्धे श्वेतवराह-कल्पे वैवस्वत-मन्वन्तरे अष्टाविंशतितमे कलि-युगे प्रथमे पादे जम्बू-द्वीपे भारत-वर्षे भरतखण्डे मेरोः दक्षिणे पार्श्वे अस्मिन् वर्तमाने व्यावहारिकाणां प्रभवादीनां षष्ट्याः संवत्सराणां मध्ये**

**विश्वावसु**-नाम-संवत्सरे **उत्तरायणे हेमन्त**-ऋतौ **मकर-माघ**-मासे **शुक्ल**-पक्षे **अष्टम्यां** शुभतिथौ **इन्दु**वासरयुक्तायाम् **अश्विनी**-नक्षत्र (१२:३१)युक्तायां **साध्य**-योग (०९:०८; **शुभ**-योग)युक्तायां **भद्रा**-करण (१०:१७; **बव**-करण)युक्तायाम् एवं-गुण-विशेषण-विशिष्टायाम् अस्याम् **अष्टम्यां**

शुभ-तिथौ श्री-परमेश्वर-प्रीत्यर्थं भीष्माष्टमी-पुण्य-काले भीष्म-तर्पणं भीष्म-अर्घ्य-प्रदानं च करिष्ये।

**जीवत्-पिताऽपि कुर्वीत तर्पणं यम-भीष्मयोः**

(Those whose father is living must also offer Tarpanam for Yama and Bhishma)

According to this vachana, those whose father is alive should also offer Tarpanam to Bhishma. Those who do not have a father should wear the Yajnopavitam on the left and offer tarpanam via the Pitr Tirtha with water

mixed with tila (sesame). Those whose father is alive should offer Tarpanam with just as in Pitr Tarpanam in Brahmayajna (with Yajnopavitam upto the left wrist and with only water) with Pitr Tirtha.

**उदक-दान-मन्त्रः— (प्राचीनावीती)**

वैयाघ्रपाद-गोत्राय साङ्कृत्य-प्रवराय च।
गङ्गा-पुत्राय भीष्माय प्रदास्येऽहं तिलो·दकम्।
अपुत्राय ददा·म्येतत् सलिलं भीष्म-वर्मणे॥

**भीष्मं तर्पयामि। भीष्मं तर्पयामि। भीष्मं तर्पयामि।**

With the following Shlokas, everyone should offer Arghyadanam with water three times similar to how Arghyadanam is done in Sandhyavandanam.

**(उपवीती)**

सत्य-व्रताय शुचये गाङ्गेयाय महात्मने।
अर्घ्यं ददामि भीष्माय सोम-वंशो·द्भवाय च॥

**भीष्माय नमः इदमर्घ्यम्। भीष्माय नमः इदमर्घ्यम्। भीष्माय नमः इदमर्घ्यम्।**

वसूना·मवताराय शन्तनो·रात्मजाय च।
अर्घ्यं ददामि भीष्माय आ-जन्म-ब्रह्मचारिणे॥

**भीष्माय नमः इदमर्घ्यम्। भीष्माय नमः इदमर्घ्यम्। भीष्माय नमः इदमर्घ्यम्।**

## प्रार्थना

भीष्मः शान्तनवो वीरः सत्य-वादी जिते·न्द्रियः।
आभि·रद्भि·रवाप्नोतु पुत्र-पौत्रो·चिताः क्रियाः॥

With this shloka, offer Prarthana to Bhishma.

कायेन वाचा मनसे·न्द्रियै·र्वा
बुद्ध्याऽऽत्मना वा प्रकृतेः स्वभावात्।
करोमि यद्यत् सकलं परस्मै
नारायणाये·ति समर्पयामि॥

**अनेन मया कृतेन भीष्माष्टमी-पुण्य-काले भीष्म-तर्पणेन भीष्म-अर्घ्य-प्रदानेन च परमात्मा सुप्रीतः सुप्रसन्नो वरदो भवतु॥**